www.prepp.in

Prepp
Your Personal Exams Guide

**SET-4**

**Series SGN**

**कोड नं.**
**Code No.** **22**

रोल नं.
Roll No.

परीक्षार्थी कोड को उत्तर-पुस्तिका के मुख-पृष्ठ पर अवश्य लिखें ।

Candidates must write the Code on the title page of the answer-book.

- कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **15** हैं ।
- प्रश्न-पत्र में दाहिने हाथ की ओर दिए गए कोड नम्बर को छात्र उत्तर-पुस्तिका के मुख-पृष्ठ पर लिखें ।
- कृपया जाँच कर लें कि इस प्रश्न-पत्र में **16** प्रश्न हैं ।
- **कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें ।**
- इस प्रश्न-पत्र को पढ़ने के लिए 15 मिनट का समय दिया गया है । प्रश्न-पत्र का वितरण पूर्वाह्न में 10.15 बजे किया जाएगा । 10.15 बजे से 10.30 बजे तक छात्र केवल प्रश्न-पत्र को पढ़ेंगे और इस अवधि के दौरान वे उत्तर-पुस्तिका पर कोई उत्तर नहीं लिखेंगे ।
- Please check that this question paper contains **15** printed pages.
- Code number given on the right hand side of the question paper should be written on the title page of the answer-book by the candidate.
- Please check that this question paper contains **16** questions.
- **Please write down the Serial Number of the question before attempting it.**
- 15 minute time has been allotted to read this question paper. The question paper will be distributed at 10.15 a.m. From 10.15 a.m. to 10.30 a.m., the students will read the question paper only and will not write any answer on the answer-book during this period.

# संस्कृतम् (केन्द्रिकम्)

# SANSKRIT (Core)

*समय : होरात्रयम्* | *पूर्णाङ्काः : 100*

*निर्धारित समय : 3 घण्टे* | *अधिकतम अंक : 100*

*Time allowed : 3 hours* | *Maximum Marks : 100*

***निर्देशाः :***

*सङ्केताभावे सर्वेषां प्रश्नानामुत्तराणि, संस्कृतेनैव लेखनीयानि ।*

*जहाँ स्पष्ट संकेत नहीं हैं, वहाँ उत्तर संस्कृत में ही दीजिए ।*

*Answer the questions in Sanskrit only unless stated otherwise.*

*अस्मिन् प्रश्नपत्रे **चत्वारः** खण्डाः सन्ति ।*

*इस प्रश्न-पत्र में **चार** खण्ड हैं ।*

*There are **four** sections in this question paper.*

| | | |
|---|---|---|
| खण्डः क | अपठितांश – अवबोधनम् (अपठितांश – अवबोधन) | 10 अङ्काः |
| SECTION A | (Unseen Reading Comprehension) | |
| खण्डः ख | संस्कृतेन रचनात्मककार्यम् (संस्कृत रचनात्मक कार्य) | 15 अङ्काः |
| SECTION B | (Sanskrit Writing Skills) | |
| खण्डः ग | अनुप्रयुक्तव्याकरणम् (अनुप्रयुक्त व्याकरण) | 30 अङ्काः |
| SECTION C | (Applied Grammar) | |
| खण्डः घ | भाग I – पठितांश – अवबोधनम् (पठितांश – अवबोधन) | 35 अङ्काः |
| SECTION D | PART I – Reading Comprehension | |
| | भाग II – सामान्यः संस्कृतसाहित्यपरिचयः (सामान्य संस्कृत साहित्य परिचय) | 10 अङ्काः |
| | PART II – General Introduction to Sanskrit Literature | |

Prepp
Your Personal Exams Guide

## खण्डः क (SECTION A)
## अपठितांश – अवबोधनम्
## अपठितांश – अवबोधन
## Unseen Reading Comprehension

*10 अङ्काः*

**1.** अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत ।

निम्नलिखित गद्यांश को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में दीजिए ।

Read the following passage and answer the given questions in Sanskrit.

**गद्यांशः**

कस्मिंश्चिद् नगरे शुद्धपटको नामकः एकः रजकः निवसति स्म । तस्य पार्श्वे एकः गर्दभः आसीत्, परं तृणानाम् अप्राप्त्या सः अतिदुर्बलः संजातः । अथ कदाचन रजकः एकं मृतं सिंहम् अलभत । तत्कालं तस्य मनसि विचारः समागतः यद् यदि अहं गर्दभम् अस्य सिंहस्य त्वचा आच्छाद्य क्षेत्रे त्यजामि, तर्हि क्षेत्ररक्षकाः इमं सिंहं मत्वा क्षेत्रात् न निःसारयिष्यन्ति । इत्थं स रजकः गर्दभं सिंहत्वचा आच्छाद्य प्रतिदिनं क्षेत्रे त्यजति स्म, गर्दभश्च क्षेत्रशस्यादिकं खादित्वा गृहम् आगच्छति स्म, कतिपयदिनैश्च स्थूलशरीरः अभवत् । एकदा रात्रौ अन्यस्मिन् क्षेत्रे कश्चन गर्दभः उच्चस्वरेण चीत्कारं कर्तुम् आरब्धवान्, तदा रजकस्य गर्दभोऽपि जातिस्वभावात् तथैव तारस्वरेण आक्रन्दत् । क्षेत्ररक्षकाश्च तं गर्दभं ज्ञात्वा लगुडैः आहत्य अमारयन् । अतः सत्यमेव उच्यते यत् स्वभावो हि दुरतिक्रमः ।

**प्रश्नाः**

(अ) एकपदेनोत्तरत ।
एक शब्द में उत्तर दीजिए ।
Answer in one word. $\frac{1}{2} \times 4 = 2$

(i) रजकस्य नाम किम् आसीत् ?

(ii) रजकः गर्दभं कुत्र त्यजति स्म ?

(iii) रजकः गर्दभं कस्य त्वचा आवृतम् अकरोत् ?

(iv) क्षेत्ररक्षकाः कम् अमारयन् ?

(ब) पूर्णवाक्येनोत्तरत ।
पूर्ण वाक्य में उत्तर दीजिए ।
Answer in a complete sentence. $1 \times 2 = 2$

(i) क्षेत्ररक्षकाः गर्दभं क्षेत्रात् कुतः न निःसारयन्ति स्म ?

(ii) गर्दभः अतिदुर्बलः कुतः संजातः ?

Prepp
Your Personal Exams Guide

(स) यथानिर्देशमुत्तरत ।
निर्देशानुसार उत्तर दीजिए ।
Answer as directed. *1×4=4*

(i) 'निवसति स्म' इति क्रियापदस्य कर्तृपदं किम् ?

(ii) 'दिने' इत्यस्य किं विलोमपदम् अत्र प्रयुक्तम् ?

(iii) रजकः मृतं कम् अलभत ?

(iv) 'मत्वा' इत्यस्य किं पर्यायपदम् अत्र प्रयुक्तम् ?

(द) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत ।
इस अनुच्छेद के लिए उपयुक्त शीर्षक संस्कृत में लिखिए ।
Write a suitable title for this passage in Sanskrit. *2*

## खण्डः ख (SECTION B)
## संस्कृतेन रचनात्मककार्यम्
## संस्कृत रचनात्मक कार्य
## Sanskrit Writing Skills

*15 अङ्काः*

**2.** भवतां विद्यालये आयोक्ष्यमाणे वार्षिकोत्सवे संस्कृतनाटकस्य मञ्चनं भविष्यति । अस्मिन्नवसरे स्वमित्राय प्रेषिते निमन्त्रणपत्रे मञ्जूषातः पदानि चित्वा रिक्तस्थानानि पूरयत ।

आपके विद्यालय में आयोजित किए जाने वाले वार्षिकोत्सव में संस्कृत नाटक का मंचन होना है । इस अवसर पर मित्र को लिखे गए निमन्त्रण-पत्र में मञ्जूषा में दिए गए शब्दों से रिक्त स्थानों की पूर्ति करके पुनः लिखिए ।

On the annual day of your school, a performance of Sanskrit drama is to take place. In an invitation to your friend fill in the blanks with the words given in the box below and rewrite the same. $\frac{1}{2} \times 10=5$

प्रिय मित्र सुकेश !

सप्रेम (i) __________

अत्र सर्वं कुशलं तत्राप्यस्तु । अस्माकं (ii) __________ वार्षिकोत्सवः वसन्तपञ्चमीपर्वणः अवसरे आयोक्ष्यते । अत्र महाकविभवभूतिविरचितस्य (iii) __________ प्रथमाङ्कद्वयस्य (iv) __________ छात्रैः प्रस्तोष्यते । अयं ग्रन्थः करुणरसपरिपूर्णः

(v) __________ । अहमत्र लक्ष्मणस्य (vi) __________ निर्वहामि । अस्माभिः प्रतिदिनं नाटकस्य (vii) __________ क्रियते । त्वम् एतद् दृष्ट्वा नूनम् (viii) __________ अनुभविष्यसि । अस्मिन्दिने त्वया अवश्यमेव अत्र (ix) __________ । परिवारे सर्वेभ्यः मम (x) __________ निवेदनीयाः ।

तव अभिन्नमित्रम्

नचिकेताः

**मञ्जूषा**

| |
|---|
| प्रणामाञ्जलयः, नमो नमः, आगन्तव्यम्, विद्यालयस्य, उत्तररामचरितस्य, आनन्दम्, मञ्चनम्, पूर्वाभ्यासः, अस्ति, भूमिकाम् । |

**3.** मञ्जूषाप्रदत्तपदानां साहाय्येन अधोलिखितायां लघुकथायां रिक्तस्थानानि पूरयित्वा कथां पुनः लिखत ।

मञ्जूषा में दिए गए शब्दों की सहायता से निम्नलिखित लघुकथा में रिक्त स्थानों की पूर्ति कर कथा को पुनः लिखिए ।

Fill in the blanks in the following short story with the help of the words given in the box below and rewrite the same. $\frac{1}{2} \times 10 = 5$

भारतभूमौ नैकाः (i) __________ प्रवहन्ति । एतासां (ii) __________ गङ्गा अतिमहत्त्वपूर्णास्ति । (iii) __________ नामान्तरं भागीरथी अपि अस्ति, यतः भगीरथेन इयं हिमालयात् आनीता । अस्याः नद्याः (iv) __________ अनेकानि (v) __________ अपि स्थितानि । एतेषु कानिचित्तु तीर्थरूपेणापि (vi) __________ । (vii) __________ निःसृता इयं गङ्गा (viii) __________ संगमतीर्थे यमुनया सार्धं मिलति । पुनः (ix) __________ एका धारा कोलकातापार्श्वे (x) __________ विलीना भवति ।

**मञ्जूषा**

| |
|---|
| बंगालसागरे, नद्यः, अस्याः, मध्ये, प्रयागनगरे, तीरेषु, प्रसिद्धानि, नगराणि, हिमालयात्, गङ्गायाः । |

**4.** मञ्जूषायां प्रदत्तपदानां साहाय्येन **पञ्चभिः** संस्कृतवाक्यैः "विजयदशमी" इति विषयम् अधिकृत्य वर्णनं कुरुत ।

मञ्जूषा में दिए गए पदों की सहायता से "विजयदशमी" विषय का वर्णन **पाँच** संस्कृत वाक्यों में कीजिए।

With the help of the words given in the box below describe "Vijayadashami" in **five** sentences in Sanskrit. *1×5=5*

**मञ्जूषा**

| |
|---|
| असत्योपरि, सत्यस्य, विजयद्योतकम्, रामरावणयोः, युद्धम्, रावणः, कुम्भकर्णः, मेघनादः, विशालाः पुत्तलिकाः, क्रीडनकपरिपूर्णाः, रात्रौ, अशेषभारते, सीताप्राप्तिः, हनुमान्, वानराः । |

**खण्डः ग (SECTION C)**

**अनुप्रयुक्तव्याकरणम्**

**अनुप्रयुक्त व्याकरण**

**Applied Grammar** *30 अङ्काः*

**5.** अधोलिखितवाक्येषु रेखाङ्कितपदानां सन्धिच्छेदं कुरुत ।

निम्नलिखित वाक्यों में रेखांकित पदों का सन्धि-विच्छेद कीजिए ।

Disjoin Sandhis in the underlined words of the following sentences. *1×6=6*

(i) अहो राजते कीदृशीयं हिमानी ।

(ii) प्राचीनश्च श्वेतस्तूपः ।

(iii) जीवत्यनाथः वने विसर्जितः ।

(iv) अशक्तैर्बलिनः शत्रोः ।

(v) अहं पर्वताद्दूरमारोप्य पातितोऽस्मि ।

(vi) प्रासादोऽपि अत्रैव वर्तते ।

**6.** अधोलिखितवाक्येषु रेखाङ्कितसमस्तपदानां विग्रहा लेख्याः ।
निम्नलिखित वाक्यों में रेखांकित समस्त-पदों के विग्रह लिखिए ।
Expound the underlined words of the following sentences. *1×6=6*

(i) किम् अस्थाने महान् प्रजाधनापव्ययः ?

(ii) सर्वे कक्षायां यथास्थानम् उपविशन्ति ।

(iii) पुरुषस्य सोच्छ्वासं मरणम् ।

(iv) पितृवधात् क्रुद्धः मलयकेतुः अभियोक्तुम् उद्यतः ।

(v) सुमहिमा यद्यस्ति ।

(vi) चङ्गेरिकाहस्ता चेटी प्रविशति ।

**7.** अधोलिखितवाक्येषु कोष्ठकान्तर्गतप्रकृतिं प्रत्ययं च योजयित्वा रिक्तस्थानानि पूरयत ।
निम्नलिखित वाक्यों में कोष्ठक के अन्तर्गत दी गई प्रकृति के साथ निर्दिष्ट प्रत्यय को जोड़कर रिक्त स्थानों की पूर्ति कीजिए ।
Fill in the blanks in the following sentences by adding suffixes to the roots and words given in the brackets. *1×8=8*

(i) चाणक्यं शिरसा __________ विज्ञापयति । (प्र + नम् + क्त्वा)

(ii) त्वया निबन्धस्य __________ करणीया । (प्र + स्तु + क्तिन्)

(iii) __________ बुद्धं प्रति भक्तिभावं दर्शयन्ति । (भग + मतुप्)

(iv) अत एव __________ इच्छामि । (श्रु + तुमुन्)

(v) ततः प्रभाते अत्र __________ । (आ + गम् + तव्यत्)

(vi) किमर्थं वयम् __________ । (आ + ह्वे + क्त)

(vii) साधोः शीलं सर्वत्र __________ भवति । (वन्द् + अनीयर्)

(viii) अभियानं __________ आसीत् । (साहस + ठक्)

Prepp
Your Personal Exams Guide

**8.** अधोलिखितेषु वाक्येषु कर्तृक्रियापदयोः अन्वितिः क्रियताम् ।

निम्नलिखित वाक्यों में कर्ता एवं क्रिया पदों की अन्विति कीजिए ।

Write the suitable verbs according to the subject in the following sentences. *1×5=5*

(i) सुखं हि दुःखान्यनुभूय __________ । (शोभते/शोभन्ते)

(ii) अहं त्वां निमन्त्रयितुम् __________ । (इच्छति/इच्छामि)

(iii) __________ ते मूढधियः पराभवम् । (व्रजति/व्रजन्ति)

(iv) मैत्रेयः इत एव __________ । (आगच्छति/आगच्छन्ति)

(v) संगणकभाषायाः जन्म एव न __________ । (अभविष्यत्/अभविष्यन्)

**अथवा (OR)**

अधोलिखितेषु वाक्येषु विशेष्यैः सह मञ्जूषायाः विशेषणपदानि योजयत ।

निम्नलिखित वाक्यों में मञ्जूषा से विशेष्य के अनुसार विशेषण जोड़िए ।

Write the appropriate adjectives from the box with their qualifying nouns in the following sentences. *1×5=5*

(i) न कदाचित् आर्यस्य __________ प्रवृत्तिः ।

(ii) __________ पादपाः निपतन्ति ।

(iii) तत्र __________ शल्यकार्यं वर्णितम् ।

(iv) अन्ये __________ स्तम्भाः सन्ति ।

(v) कुत्र नु खलु __________ योग्यं जनं लभेय ।

**मञ्जूषा**

| |
|---|
| दरिद्रम्, निष्प्रयोजना, विस्मयकराः, सुबद्धमूलाः, अष्टविधम् । |

**9.** अधोलिखितेषु वाक्येषु कोष्ठकपदैः सह उपयुक्तविभक्तिं प्रयुज्य रिक्तस्थानानि पूरयत ।

निम्नलिखित वाक्यों में कोष्ठक में दिए गए शब्दों से उपयुक्त विभक्ति का प्रयोग कर रिक्त स्थानों की पूर्ति कीजिए ।

Fill in the blanks using appropriate case-endings with the words given in the brackets in the following sentences. *1×5=5*

(i) वेदाः एतस्य __________ । (वन्दिन्)

(ii) अलम् अनेन __________ । (विनय)

(iii) कथं स्पर्धते __________ सह दुरात्मा राक्षसः । (अस्मद्)

(iv) आर्य ! __________ एव अहम् आर्यस्य चरणयोः प्रेषितः । (देव)

(v) लोभश्चेद् __________ किम् ? (अगुण)

Prepp
Your Personal Exams Guide

## खण्डः घ (SECTION D)

## भाग I

## (PART I)

## पठितांश – अवबोधनम्

## पठितांश – अवबोधन

## Reading Comprehension

*35 अङ्काः*

**10.** अधोलिखितं गद्यांशं, पद्यं, नाट्यांशं च पठित्वा तदाधारितान् प्रश्नान् संस्कृतेनोत्तरत ।
निम्नलिखित गद्यांश, पद्य तथा नाट्यांश को पढ़कर उन पर आधारित प्रश्नों के उत्तर संस्कृत में दीजिए ।
Read the following prose, verse and drama passages and answer the questions based on them in Sanskrit.

(क) **गद्यांशः**

"अनुगृहीता वयं भवत्याः सुषमायाः ज्ञानपूर्णेन सूचनाप्रदानेन । इदानीम् एषा गोष्ठी समाप्तिं याति । एवं ये छात्राः भारतीयविज्ञानक्षेत्रे विशिष्टाः उपलब्धीः आधृत्य अध्ययनं करिष्यन्ति, ते अग्रिमगोष्ठ्यां प्रस्तुतिं करिष्यन्ति । अस्माकं प्रधानाचार्याः श्वः प्रार्थनासभायां सम्मानपत्राणि प्रदास्यन्ति । सम्प्रति वयं शान्तिपाठं करिष्यामः ।"

**प्रश्नाः**

(अ) एकपदेनोत्तरत ।
एक शब्द में उत्तर दीजिए ।
Answer in one word. $\frac{1}{2} \times 2 = 1$

(i) सूचनाप्रदानेन के अनुगृहीताः ?

(ii) सम्प्रति किं करिष्यामः ?

(ब) पूर्णवाक्येनोत्तरत ।
पूर्ण वाक्य में उत्तर दीजिए ।
Answer in a complete sentence. *1*

प्रधानाचार्याः किं करिष्यन्ति ?

(स) यथानिर्देशमुत्तरत ।
निर्देशानुसार उत्तर दीजिए ।
Answer as directed.

(i) का समाप्तिं याति ? $\frac{1}{2}$

(ii) उपलब्धीः अस्य विशेषणं किम् ? $\frac{1}{2}$

(iii) 'श्वः' इत्यस्य विलोमपदं किम् ? *1*

(iv) 'अधुना' इत्यस्य किं पर्यायपदम् अत्र प्रयुक्तम् ? *1*

(ख) **पद्यम्**

व्रजन्ति ते मूढधिय: पराभवम्,
भवन्ति मायाविषु ये न मायिन: ।
प्रविश्य हि घ्नन्ति शठास्तथाविधान्
असंवृताङ्गान् निशिता इवेषव: ।।

**प्रश्ना:**

(अ) एकपदेनोत्तरत ।
एक शब्द में उत्तर दीजिए ।
Answer in one word. $\frac{1}{2} \times 2 = 1$

(i) कीदृशा: इषव: असंवृताङ्गान् प्रविश्य घ्नन्ति ?

(ii) ये मायाविषु मायिन: न भवन्ति, ते कुत्र व्रजन्ति ?

(ब) पूर्णवाक्येनोत्तरत ।
पूर्ण वाक्य में उत्तर दीजिए ।
Answer in a complete sentence. *1*

के पराभवं व्रजन्ति ?

(स) यथानिर्देशमुत्तरत ।
निर्देशानुसार उत्तर दीजिए ।
Answer as directed.

(i) 'दुष्टा:' इत्यर्थे किं पदम् अत्र प्रयुक्तम् ? $\frac{1}{2}$

(ii) 'विजयम्' इति पदस्य किं विलोमपदम् अत्र प्रयुक्तम् ? $\frac{1}{2}$

(iii) 'घ्नन्ति' इति क्रियापदस्य कर्तृपदं किम् ? *1*

(iv) 'निशिता:' इति कस्य पदस्य विशेषणम् अस्ति ? *1*

(ग) **नाट्यांश:**

*कञ्चुकी* — (प्रविश्य) (परिक्रम्य अवलोक्य च) इदम् आचार्यचाणक्यस्य गृहम् । अहो राजाधिराजमन्त्रिणो विभूति: । तथाहि गोमयानाम् उपलभेदकम् एतत् प्रस्तरखण्डम् । इत: शिष्यै: आनीतानां दर्भाणां स्तूप:, अत्र शुष्यमाणै: समिद्भि: अतिनमित: छदिप्रान्ता: जीर्णा: भित्तय: । अत एव नि:स्पृहत्यागिभि: एतादृशै: जनै: राजा तृणवद् गण्यते ।

Prepp
Your Personal Exams Guide

**प्रश्नाः**

(अ) एकपदेनोत्तरत ।
एक शब्द में उत्तर दीजिए ।
Answer in one word. $\frac{1}{2} \times 2=1$

(i) उपलभेदकं किम् अस्ति ?

(ii) अतिनमितः कः ?

(ब) पूर्णवाक्येनोत्तरत ।
पूर्ण वाक्य में उत्तर दीजिए ।
Answer in a complete sentence. *1*

कीदृशैः जनैः राजा तृणवद् गण्यते ?

(स) यथानिर्देशमुत्तरत ।
निर्देशानुसार उत्तर दीजिए ।
Answer as directed.

(i) 'समिद्भिः' इति पदस्य किं विशेषणपदं प्रयुक्तम् ? $\frac{1}{2}$

(ii) 'कुशानाम्' इत्यर्थे किं पर्यायपदं प्रयुक्तम् ? $\frac{1}{2}$

(iii) 'जीर्णाः' इति पदस्य विशेष्यपदं किम् ? *1*

(iv) 'गुरुभिः' इत्यस्य किं विलोमपदम् अत्र प्रयुक्तम् ? *1*

**11.** यथानिर्देशं प्रश्न**द्वयम्** उत्तरत ।
निर्देशानुसार **दोनों** प्रश्नों के उत्तर दीजिए ।
Answer **both** the questions as directed. *2+2=4*

(अ) 'अद्य तु आहारवृत्तिः सञ्जाता' – अस्याः पङ्क्तेः सन्दर्भग्रन्थस्य लेखकस्य च नामनी लिखत ।

(ब) 'किं भवान् अर्थविभवं चिन्तयति' – इमां पङ्क्तिं कः कं वदति ?

**12.** प्रत्येकम् अंशस्य प्रदत्त-भावार्थत्रयात् शुद्धं भावार्थं चित्वा लिखत ।
प्रत्येक अंश के लिए दिए गए तीन भावार्थों में से शुद्ध भावार्थ चुनकर लिखिए ।
Pick out and write the correct one out of the three explanations given for each of the following lines. *2×2=4*

(अ) "दुराराध्या हि राजलक्ष्मीः"

**भावार्थाः**

(i) राजलक्ष्मीः आराधायितुम् अशक्या ।
(ii) प्राप्तस्य राज्यस्य संरक्षणं राज्ञः कृते अतिकठिनं भवति ।
(iii) राज्ञा सदैव प्रजानां रक्षणं कर्तव्यम् ।

(ब) "घनीभूतं हिमं गिरिराजस्य शोभां वर्धयति ।"

**भावार्थः:**

(i) छविः हिमालयस्य शोभां वर्धयति ।

(ii) संचितं हिमम् अनवरतं पर्वतराजहिमालयस्य कान्तिं समृद्धां करोति ।

(iii) हिमालयस्य द्युतिः शीतीभूतं हिमं वर्धयति ।

**अथवा (OR)**

अधोलिखितस्य पद्यस्य प्रदत्तं भावार्थं मञ्जूषाप्रदत्तपदैः पूरयित्वा पुनः लिखत ।

निम्नलिखित पद्य के लिए दिए गए भावार्थ को मञ्जूषा में दिए गए पदों से पूर्ण कर पुनः लिखिए ।

Complete the central idea of the given verse with the words given in the box below and rewrite the same. $\frac{1}{2} \times 8=4$

शिक्षा क्षयं गच्छति कालपर्ययात्, सुबद्धमूलाः निपतन्ति पादपाः ।
जलं जलस्थानगतं च शुष्यति, हुतं च दत्तं च सदैव तिष्ठति ।।

**भावार्थः**

कालः सदा (i) __________ । कालेन प्राप्ता विद्या अपि शनैः शनैः (ii) __________ । कालेन एव (iii) __________ वृक्षा अपि जीर्णाः भूत्वा (iv) __________ पतन्ति । जलस्य गन्तव्यस्थानमपि (v) __________ जायते, परन्तु नरेण (vi) __________ प्रदत्तं (vii) __________ प्रदत्तं धनादिकं सदैव (viii) __________ भवति ।

**मञ्जूषा**

| यज्ञाग्नौ, स्थिरं, भूमौ, दृढाः, विस्मर्यते, परिवर्तते, शुष्कं, दीनेभ्यः |
|---|

**13.** अधोलिखितस्य श्लोक**द्वयस्य** प्रदत्तान्वये मञ्जूषातः पदैः रिक्तस्थानपूर्तिं कृत्वा अन्वयं पुनः लिखत ।

निम्नलिखित **दो** श्लोकों के लिए दिए गए अन्वयों में मञ्जूषा के पदों से रिक्त स्थानों की पूर्ति कर अन्वय को पुनः लिखिए ।

The prose-order-renderings of the following **two** verses have been given below. Fill in the blanks from the words given in the box and rewrite the same. $\frac{1}{2} \times 8=4$

(अ) सत्यं न मे धनविनाशगता विचिन्ता
भाग्यक्रमेण हि धनानि पुनर्भवन्ति ।
एतत्तु मां दहति नष्टधनश्रियो मे
यत् सौहृदानि सुजने शिथिलीभवन्ति ।।

**अन्वय:**

सत्यं मे धनविनाशगता (i) __________ न (अस्ति), हि भाग्यक्रमेण धनानि (ii) __________ भवन्ति । एतत् तु मां दहति यत् (iii) __________ मे (iv) __________ सुजने शिथिलीभवन्ति ।

(ब) अरक्षितं तिष्ठति दैवरक्षितं सुरक्षितं दैवहतं विनश्यति ।
जीवत्यनाथोऽपि वने विसर्जित: कृतप्रयत्नोऽपि गृहे न जीवति ।।

**अन्वय:**

अरक्षितम् (i) __________ तिष्ठति । सुरक्षितम् (ii) __________ विनश्यति । अनाथ: वने (iii) __________ अपि जीवति । (iv) __________ गृहे अपि न जीवति ।

**मञ्जूषा**

| |
|---|
| कृतप्रयत्न:, विचिन्ता, विसर्जित:, पुन:, दैवहतम्, नष्टधनश्रिय:, दैवरक्षितम्, सौहृदानि । |

**14.** अधोलिखितानां **'क'** स्तम्भस्य वाक्यांशानां **'ख'** स्तम्भस्य वाक्यांशै: सह सार्थकसम्मेलनं कृत्वा वाक्यानि पुन: लिखत ।
निम्नलिखित **'क'** स्तम्भ के वाक्यांशों का **'ख'** स्तम्भ के वाक्यांशों के साथ सार्थक मिलान कर वाक्यों को पुन: लिखिए ।
Match the following sentences of Column **'क'** with the suitable sentences of Column **'ख'** and rewrite the same. *1×4=4*

| | **'क'** | | **'ख'** |
|---|---|---|---|
| (i) | यदि स्वर्णम् अशुद्धं भवेत् | (अ) | द्वादशसु भागेषु विभनक्ति । |
| (ii) | अयं वत्सरं | (ब) | नान्या तेषां गतिर्भवेत् । |
| (iii) | एको हि दोषो गुणसन्निपाते | (स) | तर्हि चतुर्गुणेन सीसेन शोधयेत् । |
| (iv) | अश्रितव्य: अथवा दुर्ग: | (द) | निमज्जतीन्दो: किरणेष्विवाङ्क: । |

**15.** अधोलिखितेषु वाक्येषु रेखाङ्कितशब्दानां प्रसङ्गानुसारं सार्थकम् अर्थं चित्वा लिखत ।
निम्नलिखित वाक्यों में रेखांकित शब्दों के प्रसंगानुसार सार्थक अर्थ चुनकर लिखिए ।
Select and write the appropriate meanings of the underlined words in the following sentences according to the context. *1×4=4*

(अ) "<u>शुचि</u> मन: यद्यस्ति ।"
(i) अपवित्रम्
(ii) पवित्रम्
(iii) शोकाकुलम् ।

(ब) इत्याख्य: प्रासादोऽपि वर्तते ।

(i) आवास:

(ii) वनम्

(iii) हर्म्यम् ।

(स) "एको हि दोषो गुणसन्निपाते ।"

(i) काले

(ii) समूहे

(iii) जले ।

(द) "गायत्री अमुमेव गायति ।"

(i) स्तौति

(ii) नमस्करोति

(iii) क्रीडति ।

## खण्ड: घ (SECTION D)

## भाग II

## (PART II)

## सामान्य: संस्कृतसाहित्यपरिचय:

## सामान्य संस्कृत साहित्य परिचय

## General Introduction to Sanskrit Literature *10 अङ्का:*

**16.** (अ) अधोलिखितेषु कस्यापि ***एकस्य*** संक्षिप्त: परिचय: संस्कृतेन लेख्य: ।

निम्नलिखित में से किसी ***एक*** का संक्षिप्त परिचय संस्कृत में लिखिए ।

Write a brief note on any ***one*** of the following in Sanskrit. *5*

अम्बिकादत्तव्यास:, कालिदास:, भर्तृहरि: ।

**अथवा (OR)**

अधोलिखितेषु मञ्जूषापदसाहाय्येन रिक्तस्थानानि पूरयित्वा पुनः लिखत ।

निम्नलिखित में मञ्जूषा के पदों की सहायता से रिक्त स्थानों की पूर्ति कर पुनः लिखिए ।

Fill in the blanks in the following using the words from the box and rewrite the same. $\frac{1}{2} \times 10 = 5$

(i) नाटकेषु विघ्नविघाताय प्रारम्भे __________ भवति ।

(ii) वराहमिहिरेण __________ लिखिता ।

(iii) कौटिल्यस्य अपरं नाम __________ अस्ति ।

(iv) पञ्चतन्त्रस्य लेखकः __________ अस्ति ।

(v) दूतकाव्ये __________ भवति ।

(vi) आख्यायिका __________ भेदः ।

(vii) खण्डकाव्ये जीवनस्य __________ वर्णनं भवति ।

(viii) __________ चम्पूकाव्यं भवति ।

(ix) पद्यकाव्यस्य भेदद्वयं भवति, महाकाव्यं __________ च ।

(x) महर्षिः भारद्वाजः __________ लिखितवान् ।

**मञ्जूषा**

| |
|---|
| विमानशास्त्रम्, नान्दी, खण्डकाव्यम्, बृहत्संहिता, गद्यपद्यमयम्, चाणक्यः, एकपक्षस्य, विष्णुशर्मा, गद्यकाव्यस्य, सन्देशः । |

(ब) संस्कृतमहाकाव्यस्य काः अपि **पञ्च** विशेषताः संस्कृतेन लिखत ।

संस्कृत महाकाव्य की किन्हीं **पाँच** विशेषताओं को संस्कृत में लिखिए ।

Write any **five** characteristics of the Sanskrit Mahakavya literature in Sanskrit. 5

Prepp Your Personal Exam Guide